जक्षणीयम्, जक्षणीयम्, जिजक्षिषणीयम्, जाजक्षणीयम्;
जक्ष्यम्, जक्ष्यम्, जिजक्षिष्यम्, जाजक्ष्यम्;
ईषज्जक्षः-दुर्जक्षः-सुजक्षः; — — —
जक्ष्यमाणः, जक्ष्यमाणः, जिजक्षिष्यमाणः, जाजक्ष्यमाणः;
जक्षः, जक्षः, जिजक्षिषः, जाजक्षः,
जक्षितुम्, जक्षयितुम्, जिजक्षिषितुम्, जाजक्षितुम्;
[1]जक्षा, जक्षणा, जिजक्षिषा, जाजक्षा;
जक्षणम्, जक्षणम्, जिजक्षिषणम्, जाजक्षणम्;
जक्षित्वा, जक्षयित्वा, जिजक्षिषित्वा, जाजक्षित्वा;
प्रजक्ष्य, प्रजक्ष्य, प्रजिजक्षिष्य, प्रजाजक्ष्य;
जक्षम् २, जक्षित्वा २, } जक्षम् २, जक्षयित्वा २, } जिजक्षिषम् २, जिजक्षिषित्वा २, } जाजक्षम् २; जाजक्षित्वा २. }

## (579) "जज युद्धे" (I-भ्वादिः-242. सक. सेट्. पर.)

जाजकः-जिका, जाजकः-जिका, जिजजिषकः-षिका, जाजजकः-जिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखदतिवत् (338) ज्ञेयानि। [A]जजनम्।

## (580) "जजि युद्धे" (I-भ्वादिः-243. सक. सेट्. पर.)

जञ्जकः-ञ्जिका, जञ्जकः-ञ्जिका, जिजञ्जिषकः-षिका, जाजञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककन्दतिवत् (163) ज्ञेयानि। [B]जञ्जा।

## (581) "जट सङ्घाते" (I-भ्वादिः-305. अक. सेट्. पर.)

जाटकः-टिका, जाटकः-टिका, जिजटिषकः-षिका, जाजटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककठतिवत् (148) ज्ञेयानि। [2]जटः-

---

1. 'गुरोश्च हलः' (3-3-103) इति स्त्रियाम् अकारप्रत्ययः।
2. पचाद्यचि (3-1-134) स्त्रियां टाप्। जटा = केशपाशस्य संहननविशेषः।
A. 'लाजादिहोतृष्वपि लज्जनप्रदा यस्मिन् विनेशुर्जजनेषु दानवाः ॥' धा. का. 1.32.
B. 'जहर्ष जञ्जातुजितस्थलैरसौ वृषैरतुज्जैर्गजगञ्जिभिर्वृतम्।' धा. का. 1. 33.